**दिनाङ्क :- 21.05.2025**

**प्रात: - 06:55**

**इयम् आकाशवाणी**

**अथ वार्ता:**

**मिस्री-प्रतिनिधिमण्डलम्**

विदेशे सिन्दूराभियाने भारतस्य कूटनीतिक-प्रकटीकरणार्थं सप्तस्थापितानां दलानां एकम् प्रथमं प्रतिनिधिमण्डलम् अद्य चतुर्णांदिशानां यात्रायै प्रस्थास्यति।

शिवसेनाया: उपनेतु: श्रीकान्तशिन्देइत्येतस्य नेतृत्वे प्रतिनिधिमण्डलम् अद्य संयुक्तारबामीरात-लाइबेरिया-कांगो-लोकतान्त्रिक-गणराज्य-सियरा लियोन-इत्येतेषां स्थलानां भ्रमणं करिष्यति। बहुदलीयं प्रतिनिधिमण्डलमेतत् आतङ्कवादं विरूध्य शून्य-सहिष्णुताया: भारतस्य सुदृढ-सन्देशेन सह सर्वेषु रूपेषु अभिव्यक्तिषु च आतङ्कवादस्य सामुख्यं कर्तुं देशस्य राष्ट्रसम्मतं दृढदृक्पातं च प्रस्तोष्यति। विदेशसचिव: विक्रम-मिस्री इत्येष: ह्य: नवदिल्ल्यां संसत्भवने त्रयाणां प्रतिनिधिमण्डलानां सदस्यान् सूचितवान्। एतस्य सूचनात्मक सत्रस्य पश्चात् वार्ताहरान् संसूचमन् शिवसेनादलीय: नेता श्रीकान्त शिन्दे इत्येष: उक्तवान् यत् येन प्रकारेण भारतम् आतङ्वादस्य सामुख्यं करोति पाकिस्तानं अभिमुखीकरोति तच्च विश्वेन ज्ञातव्यमिति।

**प्रधानमन्त्री-स्वास्थ्यम्**

प्रधानमन्त्री नरेन्द्रमोदी स्वास्थ्यक्षेत्रे स्वानुभवान् सर्वोत्तमप्रथा: च विश्वेन सह विशिष्टतया ग्लोबलसाउथ इत्येतेन वैश्विक दक्षिणने सह विनिमयीकर्तुं भारतस्य इच्छां प्रकटितवान्। श्रीमोदी वार्तां प्रकाशितवान् यत् वैश्विकदक्षिणं स्वास्थ्य -समाह्वानै: प्रभावितं वर्तते। असौ सबलतया कथितवान् यत् भारतस्य दृक्पात: अनुकरणीयं मापनीयं सतत-स्वास्थ्य प्रारूपं च प्रस्तौति। प्रधानमन्त्री ह्य: स्विट्जरलैण्डदेशस्य जिनेवायां विश्व-स्वास्थ्य-सभाया: अष्टसप्ततितमं सत्रं सम्बोधयन् वक्तव्यमेतत् कथितवान्। असौ अग्रे प्रावोचत् यत् स्वस्थ विश्वस्य भविष्यं समावेशितायां एकीकृतदृक्पाते सहयोगे च निर्भरं भवतीति।

**प्रधानमन्त्री-वार्तालाप:**

प्रधानमन्त्री नरेन्द्रमोदी ह्य: सायंकाले जर्मनचांसलर-इत्येतेन शासनाध्यक्षेण फ्रेडरिक-मर्ज इत्यमुना सह दौरभाषिकं संवादं साधितवान्। तस्मै च पदभारग्रहणानन्तरं वर्धापनानि अयच्छत्। अत्रावद्यौ उभौ नेतारौ भारत-जर्मनी-देशयोर्मध्ये रणनीतिकं सहभागित्वं प्रबलीकर्तुम् स्वप्रतिबद्धतां पुष्टिं कृतवन्तौ। उभौ क्षेत्रीय-वैश्विक-घटनाक्रमेषु विचाराणाम् आदानप्रदानमपि कृत्वा आतङ्कवादस्य विरूद्धे सङ्घर्षे ऐक्य भावस्य भावनामपि अभिव्यक्तवन्तौ।

## पद्मपुरस्काराः

गृहमन्त्रालयेन षड्विंशत्यधिक-द्विसहस्रतमवर्षाय पद्मपुस्काराय नामाङ्कनम् आमन्त्रितम्। नामाङ्कनम् राष्ट्रिय-पुरस्कार-पोर्टल्-इत्यस्य अन्तर्जालपुटकस्य माध्यमेन जुलाई-मासस्य एकत्रिंशदिनाङ्कं यावत् प्रेषितुं शक्यते। मन्त्रालयेन निर्दिष्टं यत् एतस्मिन् उल्लिखिते अन्तर्जालपटले उपलब्धप्रारूपे निर्दिष्टं सर्वं प्रासङ्गिकं विवरणं सम्मिलितं भवेदिति यस्मिन् च वर्णनात्मकरूपेण एकम् उद्धरणमपि समाविष्टं भवेदिति।

## मिजोरमराज्यम्

मिजोरमराज्यं पूर्णं साक्षर-राज्यं समुद्घोषितम्। मुख्यमन्त्री लालदुहोमा इत्यसौ ह्यः आइजोल-नगरे मिजोरम-विश्वविद्यालये केन्द्रीय-शिक्षा-राज्यमन्त्रिणः जयन्तचौधरी इत्येतस्य उपस्थितौ घोषणां कृतवान्। इयम् उपलब्धिः **न्यू-इण्डिय-लिटरसी-प्रोग्राम-इत्यतस्य** क्रियान्वयनस्य पश्चादेव मिलितास्ति।

## दिल्ली- मन्त्रिमण्डलम्

दिल्ली- मन्त्रिमण्डलेन त्रि किलोवाट्- परिमितायाः क्षमतायाः सौरफलकानां स्थापनार्थं त्रिंशत्सहस्ररूप्यकाणां अनुदानम् अनुमोदितम्। ह्यः मुख्यमन्त्रिणः रेखा गुप्ता इत्यस्याः अध्यक्षतायां मन्त्रिमण्डलस्य सभायां अयं निर्णयः कृतः। श्रीमती गुप्ता दृढीकृतवती यत् एतत् अनुदानं प्रधानमन्त्री-सूर्य-घर-योजनायाः अन्तर्गतं केन्द्रप्रशासनस्य अष्टसप्तति- सहस्ररूप्यकाणाम् अनुदानस्य पूरकं भविष्यति इति। वायु-प्रदूषणस्य निवारणार्थं प्रशासनेन धूलि-नियन्त्रणस्य योजना आरब्धा इत्यपि श्रीमती गुप्ता सूचितवती।

## आईपीएल

आईपीएल इत्येतस्यां क्रिकेट्-स्पर्धा-मालिकायां ह्यः रात्रौ क्रीडिते द्वन्द्वे दिल्ल्याः अरूणजेटली क्रीडाङ्गणे राजस्थानरॉयल्सदलेन चैन्नई-सुपर-किंग्सदलं षट्स्तोभैः पराभूतम्। तत्रैवाद्य वानखेडेक्रीडाङ्गणे मुम्बई-इण्डियन्सदलस्य सामुख्यं डेल्हीकैपिटल्सदलेन साकं भविष्यति।

॥ **इति वार्ताः**॥